
८

# यक्ष-युधिष्ठिरसंवादः



(राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषदः परिसरे भ्रमन्तः छात्राः एकां मूर्त्तिमवलोक्य परस्परमालापं कुर्वन्ति)

**नवनीता** – अरे मधुमिते! अत्रागच्छ, इमां मूर्त्तिं पश्य। कस्य मूर्त्तिः? जानासि किम्?

**मधुमिता** – नवनीते! आम्, जानामि। मूर्त्तेः अधोभागः दृश्यताम्। नाम लिखितमस्ति। महर्षिः व्यासदेवः इति।

**शक्तिकुमारः** – कः व्यासदेवः?

**मधुमिता** – कृष्णद्वैपायनः वेदव्यासः।

**विजयः** – आम्। मातुः मुखाद् अस्य नाम कदाचित् श्रुतम्।

**शक्तिकुमारः** – किं श्रुतम्? एषः महर्षिः अष्टादशपुराणानां रचयिता।

**विजयः** – सत्यम्, मम जनकः एकदा अकथयत् – *महाभारतम्* अनेन महर्षिणा विरचितम् इति।

**नवनीता** – *महाभारते* किमस्ति?

**मधुमिता** – सर्वमस्ति *महाभारते*। उक्तिरपि अस्ति *महाभारते* यत् प्राप्यते तदेव अन्यत्र प्राप्यते। यत् च सर्वत्र अन्यत्र प्राप्यते तत् सर्वं *महाभारते* प्राप्यते।

**(अस्मिन्नेव काले शिक्षकस्य प्रवेशः)**

**शिक्षकः** – मया सर्वं श्रुतम्। यूयं पुष्पोद्यानं प्रति आगच्छत। अद्य अहं *महाभारतग्रन्थात्* प्रश्नोत्तरमूलकमेकं संवादं श्रावयामि, यत्र इदानीन्तनसमाजाय भारतीयज्ञानपरम्परायाः सुष्ठु मार्गदर्शनं विद्यते।

**यक्ष उवाच** —

**किंस्वित् प्रवसतो मित्रं किंस्विन्मित्रं गृहे सतः।**
**आतुरस्य च किं मित्रं किंस्विन्मित्रं मरिष्यतः ॥१॥**

**युधिष्ठिर उवाच** —

**विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः।**
**आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ॥२॥**

**यक्ष उवाच** —

**मृतः कथं स्यात् पुरुषः कथं राष्ट्रं मृतं भवेत्।**
**श्राद्धं मृतं कथं वा स्यात् कथं यज्ञो मृतो भवेत् ॥३॥**

**युधिष्ठिर उवाच** —

**मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम्।**
**मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥४॥**

**यक्ष उवाच** —

**तपः किंलक्षणं प्रोक्तं को दमश्च प्रकीर्त्तितः।**
**क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्त्तिता ॥५॥**

© NCERT not to be republished

युधिष्ठिर उवाच —

तपः स्वधर्मवर्त्तित्वं मनसो दमनं दमः।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्त्तनम् ॥६॥

यक्ष उवाच —

किं ज्ञानं प्रोच्यते राजन् कः शमश्च प्रकीर्त्तितः।
दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ॥७॥

युधिष्ठिर उवाच —

ज्ञानं तत्त्वार्थसम्बोधः शमश्चित्तप्रशान्तता।
दया सर्वसुखैषित्वमार्जवं समचित्तता ॥८॥

यक्ष उवाच —

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ॥९॥

युधिष्ठिर उवाच —

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥१०॥

यक्ष उवाच —

कः पण्डितः पुमान् ज्ञेयो
नास्तिकः कः प्रकीर्त्तितः।
को मूर्खः कश्च कामः स्यात्
को मत्सर इति स्मृतः ॥११॥

युधिष्ठिर उवाच —

धर्मज्ञः पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥१२॥

© NCERT not to be republished

**यक्ष उवाच —**

को मोदते किमाश्चर्यं कः पन्थाः का च वार्त्तिका।
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः ॥१३॥

**युधिष्ठिर उवाच —**

पञ्चमेऽहनि षष्ठे वा शाकं पचति यो गृहे।
अनृणी चाप्रवासी च स वारिचर मोदते ॥१४॥

अहन्यहनि भूतानि गच्छन्तीह यमालयम्।
शेषा जीवितुमिच्छन्ति किमाश्चर्यमतः परम् ॥१५॥

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥१६॥

पृथ्वी विभाण्डं गगनं पिधानं
सूर्याग्निना रात्रिदिवेन्धनेन।
मासर्तुदर्वीपरिघट्टनेन
भूतानि कालः पचतीति वार्त्ता ॥१७॥

(*महाभारतम्*, वनपर्व-अध्यायः – 313)

not to be republished © NCERT

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| किंस्वित् (किम् + स्वित्) | किञ्चित् | क्या / कुछ | what? | |
| प्रवसतो (प्र+√वस्+शतृ पुं.ष.ए.व.) | प्रवासे स्थितस्य | प्रवास (विदेश) में रहने वाले का | one who lives abroad | |
| आतुरस्य | रुग्णजनस्य | बीमार व्यक्ति का | of a sick person | |
| मरिष्यतः (√मृ+शतृ) | मरणं प्राप्स्यति | मरने वाले व्यक्ति | of a dying person | |
| भिषक् | बिभेति रोगो यस्मात् | वैद्य | doctor / physician | |
| अराजकम् (बहुव्रीहिः) | अविद्यमानः राजा यस्मिन् तत् | व्यवस्था के अनुरूप न चलना | kingless state / anarchy | |
| अश्रोत्रियम् (बहुव्रीहिः) | अविद्यमानः श्रोत्रियः यस्मिन् | वेद-ज्ञान से रहित व्यक्ति | one who is ignorant of the vedas | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अदक्षिणः (बहुव्रीहिः) | अविद्यमाना दक्षिणा यस्मिन् सः | दक्षिणा से रहित | sacrifice without monetary gifts / fees | |
| प्रोक्तम् (प्र+√वच्+क्त) | कथितम् | कहा गया/ बोला गया | said / declared | |
| दमः (√दम्+घञ्, पुं. प्र.ए.व.) | संयमः | मन और इन्द्रियों का नियंत्रण | restraint | |
| प्रकीर्त्तितः (प्र+√कृत्+क्त) | कथितः / प्रसिद्धः | जाना जाता है | known | |
| स्वधर्मवर्त्तितम् | स्वधर्मे अविचलितः | अपने धर्म (कर्तव्य) पर टिके रहना | adherence to one's own duty | |
| द्वन्द्वसहिष्णुत्वम् | प्रतिक्रियायाः प्रकाशं विना कलहसहनम् | सुख–दुःख, सर्दी–गर्मी आदि युगल को सहना | tolerance of dualities (like joy–sorrow) | |
| ह्रीः (स्त्री.प्र.ए.व.) | लज्जा | शर्म / लोकलाज | modesty | |
| अकार्यनिवर्तनम् (नि+ √वृत् + ल्युट्) | कुकार्यात् निवृत्तिः | बुरे कार्यों से दूर रहना | abstaining from wrong deeds | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| शमः (√शम्+अल्) | शान्तिः | मन की शान्ति | tranquillity | |
| परा (स्त्री.प्र.ए.व.) | श्रेष्ठा | सबसे उत्तम | supreme / highest | |
| उदाहृतम् (उत् + आ + √हृ + क्त) | कथितम् | उदाहरण दिया गया | exemplified | |
| आर्जवम् | ऋजोः भावः / सरलता | सरलता | simplicity | |
| तत्त्वार्थबोधः (सम् + √बुध + घञ्) | यथार्थबोधः | वास्तविक सत्य का ज्ञान | knowledge of the ultimate truth | |
| चित्तप्रशान्तता (तत्पुरुषः) | चित्तस्य प्रशान्तता | मन की शांति | calmness of mind | |
| सर्वसुखैषित्वम् (सर्वसुख + एषित्वम्) | सर्वेषां सुखकामना | सभी के सुख की चाह रखना | wishing for everyone's happiness | |
| समचित्तता (समचित्त + ता) | सर्वान् प्रति समभावना | सुख-दुःख में एक जैसा भाव रखना | equanimity | |
| अनन्तकः (नञ् तत्पुरुषः, पुं. प्र.ए.व.) | न विद्यते अन्तः यस्य सः | जिसका कोई अंत न हो | endless | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| असाधुः (नञ् तत्पुरुषः, पुं. प्र.ए.व.) | न साधुः | जो सज्जन न हो | one who is not wise | |
| सर्वभूतहितः (तत्पुरुषः) | सर्वभूतेभ्यः हितः | सभी प्राणियों का भला चाहने वाला | compassionate for all living beings | |
| मत्सरः | ईर्ष्या | ईर्ष्या | jealousy | |
| धर्मज्ञः (धर्म+√ज्ञा+क) | धर्मं जानाति इति | धर्म को जानने वाला | knower of righteousness | |
| संसारहेतुः (षष्ठीतत्पुरुषः) | संसारस्य हेतुः | जन्म–मरण (संसार) का कारण | the cause of worldly existence | |
| हृत्तापो (षष्ठीतत्पुरुषः) | हृदः तापः | हृदय का संताप | heartache | |
| मोदते (√मुद्– आत्मने प्र.पु.ए.व.) | आनन्दितः भवति | प्रसन्न होता है | rejoices / is happy | |
| वर्त्तिका | वार्त्ता | समाचार | news | |
| अहनि अहनि | प्रतिदिनम् | प्रतिदिन | every day | |
| अनृणी | ऋणहीनः | कर्ज से मुक्त | free from debt | |
| अप्रवासी (नञ् तत्पुरुषः) | न प्रवासी | जो विदेश में न रहता हो | one who does not live abroad | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| वारिचरः (सप्तमी तत्पुरुषः) | वारिणि चरति इति | जल में रहने वाला जीव | aquatic creature | |
| इह | अस्मिन् संसारे | यहाँ | here | |
| यमालयम् (षष्ठीतत्पुरुषः) | यमस्य आलयः तम् | यमराज के घर को | the abode of yama | |
| अप्रतिष्ठः (नञ् तत्पुरुषः) | न प्रतिष्ठः | जिसकी कोई निश्चित प्रतिष्ठा (आधार) न हो | without a firm base | |
| श्रुतयः (स्त्री.प्र.ब.व.) | वेदवाक्यानि | वेद के वाक्य | vedic scriptures | |
| गुहायाम् (स्त्री.स.ए.व.) | गह्वरे | गुफा में | in the cave | |
| महाजनः (कर्मधारयः) | महान् च असौ जनश्चेति | श्रेष्ठ पुरुष | great men | |
| विभाण्डम् (नपुं.प्र.ए.व.) | विशालं पात्रम् | बड़ा बर्तन | large vessel | |
| पिधानम् (अपि+ √धा+ल्युट्) | आवरणम् | ढकना | lid | |
| दर्वी (स्त्री. प्र.ए.व.) | रन्धनसमये चमसविशेषः | करछी | cooking spoon | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

### श्लोकानां पदच्छेदः अन्वयः भावार्थश्च

**प्रथमः श्लोकः**

**पदच्छेदः** – किंस्वित् प्रवसतः मित्रम् किंस्वित् मित्रं गृहे सतः आतुरस्य च किम् मित्रम् किंस्वित् मित्रम् मरिष्यतः

**अन्वयः** – प्रवसतः किंस्वित् मित्रम्? गृहे सतः किंस्वित् मित्रम्? आतुरस्य च किं मित्रम्? मरिष्यतः किंस्वित् मित्रम्?

**भावार्थः** – यक्षः युधिष्ठिरं पृच्छति — श्रीमन्! प्रवासिजनस्य किं मित्रं भवति? गृहस्थस्य किं मित्रम्? रुग्णमनुजस्य किं मित्रम्? मरिष्यतः जनस्य किं मित्रम्? एतेषां प्रश्नानां समुचितमुत्तरं वदतु।

**द्वितीयः श्लोकः**

**पदच्छेदः** – विद्या प्रवसतः मित्रम् भार्या मित्रम् गृहे सतः आतुरस्य भिषक् मित्रम् दानम् मित्रम् मरिष्यतः

**अन्वयः** – प्रवसतः विद्या मित्रम्, गृहे सतः भार्या मित्रम्, आतुरस्य भिषक् मित्रम्, मरिष्यतः दानं मित्रम्।

**भावार्थः** – युधिष्ठिरः यक्षं कथयति – हे यक्ष! विद्या एव प्रवासिजनस्य मित्रम्। भार्या गृहस्थस्य पुरुषस्य परममित्रं भवति। रोगपीडितस्य मानवस्य वैद्यः एव मित्रम्। एवं मरिष्यतः जनस्य दानं मित्रं भवति।

**तृतीयः श्लोकः**

**पदच्छेदः** – मृतः कथम् स्यात् पुरुषः कथम् राष्ट्रम् मृतम् भवेत् श्राद्धम् मृतम् कथं वा स्यात् कथम् यज्ञः मृतः भवेत्

© NCERT not to be republished

**अन्वयः** – कथं पुरुषः मृतः स्यात्? कथं राष्ट्रं मृतं भवेत्? कथं वा श्राद्धं मृतं स्यात्? कथं यज्ञः तु मृतः भवेत्?

**भावार्थः** – पुरुषः कथं मृतं मन्यते? कथं राष्ट्रं मृतं भवति? श्राद्धं निष्फलं कथं भवति? यज्ञः कदा विनश्यति?

### चतुर्थः श्लोकः

**पदच्छेदः** – मृतः दरिद्रः पुरुषः मृतम् श्राद्धम् अराजकम् मृतम् अश्रोत्रियम् श्राद्धम् मृतः यज्ञः तु अदक्षिणः

**अन्वयः** – दरिद्रः पुरुषः मृतः, अराजकं राष्ट्रं मृतम्, अश्रोत्रियं श्राद्धं मृतम्, अदक्षिणः यज्ञः मृतः।

**भावार्थः** – यः जनः दरिद्रः सः मृत इति परिगण्यते। राजरहितं राष्ट्रं मृतवद् भवति। वेदज्ञानहीनेन ब्राह्मणेन कृतं श्राद्धं निष्फलं मन्यते, उपयुक्त–दक्षिणां विना यज्ञकर्म विनश्यति।

### पञ्चमः श्लोकः

**पदच्छेदः** – तपः किं लक्षणम् प्रोक्तम् कः दमः च प्रकीर्त्तितः क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्त्तिता

**अन्वयः** – तपः किं लक्षणं प्रोक्तम्? कः च दमः प्रकीर्तितः? का च परा क्षमा प्रोक्ता? का च ह्रीः परिकीर्तिता?

**भावार्थः** – तपसः किं लक्षणम् उक्तम्? दमस्य का संज्ञा? कीदृशी क्षमा श्रेष्ठा मन्यते? लज्जायाः स्वरूपं किम् उच्यते?

### षष्ठः श्लोकः

**पदच्छेदः** – तपः स्वधर्मवर्त्तित्वम् मनसः दमनम् दमः क्षमा द्वन्द्वसहिष्णुत्वम् ह्रीः अकार्यनिवर्त्तनम्

**अन्वयः** – स्वधर्मवर्त्तित्वं तपः, मनसः दमनं दमः। द्वन्द्वसहिष्णुत्वं क्षमा, अकार्य – निवर्त्तनं ह्रीः।

© NCERT not to be republished

**भावार्थः** – निजधर्मपालनं हि तपः कथ्यते। मनसः दमनं नाम नियन्त्रणम् एव दमः भवति। जीवने नानाविध—द्वन्द्वः आयाति यथा—सुखदुःखादयः। एतेषां सहिष्णुता एव क्षमा भवति। कुकार्यकरणात् दूरे अवस्थानं लज्जा कथ्यते।

### सप्तमः श्लोकः

**पदच्छेदः** – किम् ज्ञानम् प्रोच्यते राजन् कः शमः च प्रकीर्त्तितः दया च का परा प्रोक्ता किम् च आर्जवम् उदाहृतम्

**अन्वयः** – राजन्! ज्ञानं किं प्रोच्यते? कः च शमः प्रकीर्त्तितः? का च परा दया प्रोक्ता? किं च आर्जवम् उदाहृतम्?

**भावार्थः** – यक्षः युधिष्ठिरं कथयति– ज्ञानस्य संज्ञा का? शम इति पदेन किं ज्ञायते? कीदृशी दया उत्तमा भवति? सरलतायाः किं स्वरूपम्?

### अष्टमः श्लोकः

**पदच्छेदः** – ज्ञानम् तत्त्वार्थसम्बोधः शमः चित्तप्रशान्तता दया सर्वसुखैषित्वम् आर्जवम् समचित्तता

**अन्वयः** – तत्त्वार्थसम्बोधः ज्ञानम्, चित्तप्रशान्तता शमः। सर्वसुखैषित्वं दया, समचित्तता आर्जवम्।

**भावार्थः** – यथार्थरहस्यस्य अवबोधनं हि ज्ञानं भवति। चित्तस्य शान्तिरेव शमः कथ्यते। सर्वेषां सुखकामना हि दया। सर्वासु अवस्थासु सर्वेषु जनेषु समचित्तता एव सरलता कथ्यते।

### नवमः श्लोकः

**पदच्छेदः** – कः शत्रुः दुर्जयः पुंसाम् कः च व्याधिः अनन्तकः कीदृशः च स्मृतः साधुः असाधुः कीदृशः स्मृतः

**अन्वयः** – कः पुंसां दुर्जयः शत्रुः? कः च अनन्तकः व्याधिः? कीदृशः च साधुः स्मृतः? कीदृशः असाधुः स्मृतः?

© NCERT not to be republished

**भावार्थः** – मनुष्याणां कः शत्रुः दुर्जयः भवति? कः अनन्तकः व्याधिः कथ्यते? साधुजनस्य का संज्ञा भवति? कः मानवः असाधुः मन्यते?

### दशमः श्लोकः

**पदच्छेदः** – क्रोधः सुदुर्जयः शत्रुः लोभः व्याधिः अनन्तकः सर्वभूतहितः साधुः असाधुः निर्दयः स्मृतः

**अन्वयः** – क्रोधः सुदुर्जयः शत्रुः, लोभः अनन्तकः व्याधिः, सर्वभूतहितः साधुः, असाधुः निर्दयः स्मृतः।

**भावार्थः** – क्रोधः मनुजस्य दुर्जयः शत्रुः अस्ति। मानवस्य लोभः एव अनन्तकः व्याधिः भवति। सर्वभूतानां यः हितं साधयति सः साधुः भवति। यः जनः सर्वभूतेषु निर्दयभावं प्रकटयति स एव असाधुः इति।

### एकादशः श्लोकः

**पदच्छेदः** – कः पण्डितः पुमान् ज्ञेयः नास्तिकः कः प्रकीर्त्तितः कः मूर्खः कः च कामः स्यात् कः मत्सरः इति स्मृतः

**अन्वयः** – कः पुमान् पण्डितः ज्ञेयः? कः नास्तिकः प्रकीर्त्तितः? कः मूर्खः? कः च कामः स्यात्? कः मत्सरः इति स्मृतः?

**भावार्थः** – यक्षः युधिष्ठिरं पृच्छति—कीदृशं जनं पण्डितं जानीयात्? कः नास्तिकः इति ज्ञायते। कः मूर्खः? कः कामः स्यात्?

### द्वादशः श्लोकः

**पदच्छेदः** – धर्मज्ञः पण्डितः ज्ञेयः नास्तिकः मूर्खः उच्यते कामः संसारहेतुः च हृद्तापः मत्सरः स्मृतः

**अन्वयः** – धर्मज्ञः पण्डितः ज्ञेयः, नास्तिकः मूर्खः उच्यते? संसारहेतुः च कामः, हृत्तापः मत्सरः स्मृतः।

**भावार्थः** – यः धर्मं जानाति स एव पण्डितः भवति। यः ईश्वरे न विश्वसिति स एव

© NCERT not to be republished

नास्तिकः मूर्खः भवति, संसारस्य हेतुभूतः कामः मन्यते। हृदः तापः मत्सरः इति कथ्यते।

### त्रयोदशः श्लोकः

**पदच्छेदः** – कः मोदते किम् आश्चर्यम् कः पन्थाः का च वार्त्तिका वद मे चतुरः प्रश्नान् मृताः जीवन्तु बान्धवाः

**अन्वयः** – कः मोदते? किम् आश्चर्यम्? कः पन्थाः? का च वार्त्तिका? चतुरः प्रश्नान् (पृच्छामि) मे (उत्तरं) वद, (तव) मृताः बान्धवाः जीवन्तु।

**भावार्थः** – संसारे कीदृशः जनः सुखी भवति? संसारे वस्तुतः किम् आश्चर्यकरम्? कः प्रकृतः मार्गः? का पृथिव्याः अद्यतनी वार्त्ता? एतेषां चतुर्णां प्रश्नानां समुचितम् उत्तरं यदा दास्यति तदा भवतः भ्रातरः जीविताः भविष्यन्तीति यक्षः युधिष्ठिरम् उक्तवान्। (एतान् चतुरः प्रश्नान् पृष्ट्वा यक्षः युधिष्ठिरं वदति प्रश्नानां यथार्थोत्तराणि दत्त्वा यथेच्छं जलं पातव्यम् इति।)

### चतुर्दशः श्लोकः

**पदच्छेदः** – पञ्चमे अहनि षष्ठे वा शाकम् पचति यः गृहे अनृणी च अप्रवासी च सः वारिचर! मोदते

**अन्वयः** – वारिचर! यः अहनि पञ्चमे (अंशे) षष्ठे (अंशे) वा गृहे शाकं पचति, अनृणी अप्रवासी च (भवति), सः मोदते।

**भावार्थः** – युधिष्ठिरः कथयति— हे जलचर! यः पुरुषः दिवसस्य पञ्चमप्रहरे षष्ठप्रहरे वा निजसदने शाकान्नं पक्त्वा सात्त्विकभोजनं करोति, कदा कस्मादपि ऋणग्रहणं न करोति, यः च विदेशे न निवसति स एव वस्तुतः सुखी भवति।

### पञ्चदशः श्लोकः

**पदच्छेदः** – अहनि अहनि भूतानि गच्छन्ति इह यमालयम् शेषाः जीवितुम् इच्छन्ति किम् आश्चर्यम् अतः परम्

© NCERT not to be republished

**अन्वयः** – इह अहनि अहनि भूतानि यमालयं गच्छन्ति। शेषाः जीवितुम् इच्छन्ति, अतः परम् आश्चर्यं किम्?

**भावार्थः** – अस्मिन् संसारे प्रतिदिनं प्रतिमुहूर्तं च प्राणिनः मृत्योः मुखे पतन्ति। परन्तु ये अवशिष्टाः सन्ति, ते चिरकालं जीवितुम् इच्छन्ति। इतोऽधिकं संसारे किम् आश्चर्यकरं भवेत्?

### षोडशः श्लोकः

**पदच्छेदः** – तर्कः अप्रतिष्ठः श्रुतयः विभिन्नाः न एकः मुनिः यस्य मतम् प्रमाणम् धर्मस्य तत्त्वम् निहितम् गुहायाम् महाजनः येन गतः सः पन्थाः

**अन्वयः** – तर्कः अप्रतिष्ठः, श्रुतयः विभिन्नाः एकः मुनिः न अस्ति यस्य मतं प्रमाणम्। धर्मस्य तत्त्वं गुहायां निहितम्, महाजनः येन गतः सः पन्थाः (भवति)

**भावार्थः** – युधिष्ठिरः "कः पन्थाः?" इति प्रश्नस्य उत्तरं वदति। हे यक्ष! संसारेऽस्मिन् तर्कशास्त्रस्य मतं सर्ववादिसम्मतं न भवति। वेदेषु भिन्नमतानि दृश्यन्ते। एतादृशः कोऽपि मुनिः नास्ति यस्य मतं प्रमाणरूपेण सर्वथा गृह्यते। धर्मस्य तत्त्वं ज्ञानरूपकगुहायाम् अलक्षितभावेन विद्यते। अतः महापुरुषाः येन मार्गेण गताः सः मार्ग एव उपयुक्तमार्गः। सः मार्गः एव अनुसरणीयः।

### सप्तदशः श्लोकः

**पदच्छेदः** – पृथ्वी विभाण्डम् गगनम् पिधानम् सूर्याग्निना रात्रिदिवा इन्धनेन मास ऋतु-दर्वी-परिघट्टनेन भूतानि कालः पचति इति वार्त्ता

**अन्वयः** – पृथ्वी विभाण्डं, गगनं पिधानं, सूर्याग्निना, रात्रिदिवा इन्धनेन, मास-ऋतु-दर्वी परिघट्टनेन, कालः भूतानि पचति इति वार्त्ता।

**भावार्थः** – महाराजः युधिष्ठिरः कथितवान् — इयं पृथिवी भाण्डस्वरूपा, तस्य भाण्डस्योपरि गगनरूपं पिधानं विद्यते। सूर्यरूपकाग्निः सदैव प्रज्वलति। कालः दिवस-रात्रिरूपकेण इन्धनेन तमग्निं प्रज्वालयति। कालः स्वहस्तेन ऋतुमासरूपकदर्व्याः घटनेन प्राणिनः पचति। प्राणिनां जन्ममरणप्रक्रियां साधयति इति एषा अद्यतनी वार्ता।

© NCERT not to be republished

## अभ्यासाद् जायते सिद्धिः

१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—

(क) विद्या कस्य मित्रं भवति?

(ख) कीदृशः पुरुषः मृतः?

(ग) तपसः किं लक्षणं प्रोक्तम्?

(घ) कः शमः प्रकीर्त्तितः?

(ङ) कः पुंसां दुर्जयः शत्रुः?

(च) धर्मज्ञः पण्डितः ज्ञेयः?

(छ) भूतानि कुत्र गच्छन्ति?

२. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत—

(क) **भार्या** मित्रं गृहे सतः।

(ख) **मनसो** दमनं दमः।

(ग) **शमः** चित्तप्रशान्तता।

(घ) **गृहे** शाकं पचति।

(ङ) **शेषाः** जीवितुम् इच्छन्ति।

३. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत—

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः॥

(क) कः शत्रुः?

(ख) कः व्याधिः?

(ग) कः सर्वभूतहितः?

(घ) कः निर्दयः स्मृतः?

(ङ) क्रोधः कीदृशः शत्रुः?

© NCERT not to be republished

(च) लोभः कीदृशः व्याधिः ?

(छ) साधुः कीदृशः ?

### ४. रेखाङ्कितानां पदानां सन्धिविच्छेदं कुरुत —

| | | | |
|---|---|---|---|
| **यथा** — <u>अहन्यहनि</u> भूतानि गच्छन्ति। | अहनि | + | अहनि |
| (क) आतुरस्य <u>भिषङ्मित्रम्</u> | ................ | + | ................ |
| (ख) मृतं <u>राष्ट्रमराजकम्</u> | ................ | + | ................ |
| (ग) तपसः किं लक्षणं <u>प्रोक्तम्</u> | ................ | + | ................ |
| (घ) <u>कश्च</u> व्याधिरनन्तकः ? | ................ | + | ................ |
| (ङ) <u>साधुरसाधुः</u> कीदृशः स्मृतः ? | ................ | + | ................ |
| (च) शत्रुर्लोभो <u>व्याधिरनन्तकः</u> | ................ | + | ................ |
| (छ) <u>पञ्चमेऽहनि</u> षष्ठे वा | ................ | + | ................ |

### ५. अत्र कतिचन विग्रहवाक्यानि दत्तानि सन्ति। तेषां समस्तपदानि पाठात् चित्वा लिखत —

| **विग्रहवाक्यानि** | **समस्तपदानि** |
|---|---|
| **यथा** — अकार्यात् निवर्त्तनम् | अकार्यनिवर्त्तनम् |
| (क) तत्त्वार्थस्य सम्बोधः | ............................... |
| (ख) चित्तस्य प्रशान्तता | ............................... |
| (ग) सर्वेषां सुखैषित्वम् | ............................... |
| (घ) निर्गता दया यस्मात् सः | ............................... |

## स्वाध्यायान्मा प्रमदः

१. पुराणमुनिना व्यासदेवेन विरचिते महाभारते भारतीयसंस्कृति-सभ्यता-परम्पराणां महनीयं चित्रं सारस्वतसृष्टिरूपेण प्रतिपादितम्। कौरव-पाण्डवानां चरितं ग्रन्थेऽस्मिन् मुख्याधारः भवति। विविधाख्यानोपाख्यानानां माध्यमेन अत्र विषयः *महाभारते* प्रतिपादितः अस्ति मानवजीवनस्य पूर्णाङ्गविकासः कथं भवतीति। विश्वजनीनग्रन्थः *"श्रीमद्भगवद्गीता" महाभारतस्यान्तर्गतः*।

© NCERT not to be republished

कदाचित् अज्ञातवासकाले पाण्डवाः द्वैतवने भ्रमणसमये तृषार्त्ताः सन्तः वटवृक्षच्छायायाम् आसते स्म। तदा अग्रजः युधिष्ठिरः प्रथमतः नकुलं जलाय प्रेषितवान्। सः नकुलः अल्पदूरे एकं मनोरमं सरोवरं विलोक्य तृषार्त्तकारणात् तस्माद् जलपानार्थमुद्यतः, तदा तेन काचित् शून्यवाणी श्रुता - "प्रथमतः मम प्रश्नानां समुचितमुत्तरं प्रदाय तदनु जलपानं करोतु। परन्तु नकुलः तद्वचनम् उपेक्ष्य जलं पीत्वा संज्ञाहीनः सन् तत्र पतितः।

युधिष्ठिरोऽपि बहुकालं यावत् नकुलस्य प्रतीक्षां कृत्वा एकैकशः सहदेवम् अर्जुनं भीमं च जलमानेतुं प्रेषयामास। एकैकशः ज्येष्ठभ्रातुः आदेशेन ते पेयजलार्थं गताः परन्तु बहुकालादनन्तरमपि न प्रत्यागताः।

अन्ते युधिष्ठिरः स्वयमेव गतवान्। जलाशयतीरे मूर्च्छितान् अनुजान् अवलोक्य युधिष्ठिरः अतीव दुःखितः सञ्जातः। तदैव आकाशवाणी श्रुता — "अहं यक्षोऽस्मि। प्रथमतः मम प्रश्नानामुत्तरं कथयतु अनन्तरं जलं पीयताम्। अन्यथा तवावस्था अपि ईदृशी भवेत्। एतच्छ्रुत्वा युधिष्ठिरः यक्षपृष्टप्रश्नानां समुचितानि उत्तराणि प्रदत्तवान्।

**२. महर्षिव्यासविरचिते *महाभारतग्रन्थे* अष्टादशपर्वाणि सन्ति यथा —**

**आदिसभावनविराटोद्योगा भीष्मद्रोणकर्णशल्याश्च।**
**सौप्तिकस्त्रीशान्त्यनुशासनमाश्वमेधिकाश्रमवासिकमौसलाः**
**महाप्रास्थानिकस्वर्गारोहणे चेति पर्वाण्यष्टादशैव तु॥**

(१) आदिपर्व (२) सभापर्व (३) वनपर्व (४) विराटपर्व (५) उद्योगपर्व (६) भीष्मपर्व (७) द्रोणपर्व
(८) कर्णपर्व (९) शल्यपर्व (१०) सौप्तिकपर्व (११) स्त्रीपर्व (१२) शान्तिपर्व (१३) अनुशासनपर्व
(१४) आश्वमेधिकपर्व (१५) आश्रमवासिकपर्व (१६) मौसलपर्व (१७) महाप्रास्थानिकपर्व
(१८) स्वर्गारोहणपर्व।



## यस्तु क्रियावान् मनुजः स विद्वान्

**१. अधोलिखितान् विषयान् आदाय कथात्मकं/वर्णनात्मकं/प्रेरणात्मकम् अनुच्छेदं लिखत —**

(क) मित्रवत् सहायिका विद्या।

(ख) समाजे आदरणीयाः जनाः।

(ग) लोभः अनन्तकः व्याधिः।

(घ) संसारे मोदकराः विषयाः।

(ङ) भारते ऋतुचक्रस्य परिवर्तनम्।

© NCERT not to be republished

## २. विद्यार्थिनः समूहेषु विभज्य – (भूमिकाभिनयः)।

नवनीता, मधुमिता, शक्तिकुमारः, विजयः, शिक्षकः, यक्षः, युधिष्ठिरः

इत्येतानि पात्राणि गृह्णन्तु। संवादस्य अभिनयं कुर्वन्तु।

## ३. विद्यार्थिनः निम्नलिखितविषयेषु सूचनाः संगृह्णन्तु।

"महर्षिः व्यासदेवः"

जन्मस्थानम्, वेदानां विभागः, *महाभारतम्*, *पुराणानि*, *भगवद्गीता* इत्यादिषु विषयेषु स्फोरकपत्रम् अथवा पावर पॉइण्ट प्रजेंटेशन निर्माय प्रस्तुतिं कुरुत।

## ४. निम्नलिखितप्रश्नानामुत्तराणि संस्कृतेन लिखत —

(क) पाठात् अहं किं नवीनं ज्ञातवान्/ज्ञातवती ?

(ख) मम प्रियः यक्षप्रश्नः कः ?

(ग) मया कः गुणः स्वजीवने स्वीकर्तव्यः ?

(घ) युधिष्ठिरस्य उत्तराणि अद्य अपि कथं उपयुज्यन्ते ?

© NCERT not to be republished